# अध्यायः १६

# दैवासुरसम्पद्विभागयोगः

दैवी आसुरी राक्षसी चेति प्राणिनां प्रकृतयो नवमेऽध्याये सूचिताः।

तासां विस्तरेण प्रदर्शनाय अभयं सत्व-संशुद्धिः इत्यादिरध्याय आरभ्यते। तत्र संसार-मोक्षाय दैवी प्रकृतिः, निबन्धायाऽऽसुरी राक्षसी चेति दैव्या आदानाय प्रदर्शनं क्रियते इतरयोः परिवर्जनाय च -

**श्रीभगवानुवाच।**

**अभयं सत्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः।**

**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।। १६.१ ।।**

अभयमिति। **अभयम्** अभीरुता **सत्वसंशुद्धिः** सत्त्वस्यान्तः-करणस्य संशुद्धिः[1] संव्यवहारेषु पर-वञ्चन-मायानृतादि-परिवर्जनं शुद्ध-सत्त्व-भावेन[2] व्यवहार इत्यर्थः।

---

[1] आनन्दाश्रमे न दृश्यते।

[2] शुद्धभावेनेति। (आ)

**ज्ञान-योगव्यवस्थितिः** ज्ञानं शास्त्रत आचार्यतश्चात्मादि-पदार्थानामवगमः।

अवगतानाम् इन्द्रियाद्युपसंहारेणैकाग्रतया स्वात्म-संवेद्यतापादनं योगः।

तयोर्ज्ञानयोगयोर्व्यवस्थितिः व्यवस्थानं तन्निष्ठता। एषा प्रधाना दैवी सात्त्विकी सम्पत्।

यत्र च येषामधिकृतानां या प्रकृतिः सम्भवति सात्त्विकी सोच्यते। **दानं** यथा-शक्ति संविभागोऽन्नादीनाम्।

**दमश्च** बाह्य-करणानामुपशमः। अन्तःकरणस्योपशमं शान्तिं वक्ष्यति।

**यज्ञश्च** श्रौतोऽग्निहोत्रादिः, स्मार्त्तश्च देव-यज्ञादिः। **स्वाध्यायः** ऋग्वेदाद्यध्ययनम् अदृष्टार्थम्।

**तपः** वक्ष्यमाणं शारीरादि। **आर्जवम्** ऋजुत्वं सर्वदा।। १ ।।

किञ्च -

**अहिंसा सत्यमक्रोधः त्यागश्शान्तिरपैशुनम्।**

**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।। १६.२ ।।**

अहिंसेति। **अहिंसा** अहिंसनं प्राणिनां पीडा-वर्जनम्। **सत्यम्** अप्रियानृत-वर्जितं यथा-भूतार्थ-वचनम्।

**अक्रोधः** परैराकृष्टस्य[3] अभिहितस्य वा प्राप्तस्य क्रोधस्योपशमनम्।

**त्याग**ः संन्यासः, पूर्वं दानस्योक्तत्वात्। **शान्तिः** अन्तःकरणस्योपशमः। **अपैशुनम्** अपिशुनता, परस्मै पर-रन्ध्र-प्रकटी-करणं पैशुनं तदभावोऽपैशुनम्। **दया** कृपा **भूतेषु** दुःखितेषु।

**अलोलुप्त्वम्** इन्द्रियाणां विषय-सन्निधौ अविक्रिया। **मार्दवं** मृदुता, अक्रौर्यम्। **ह्रीः** लज्जा।

**अचापलम्** असति प्रयोजने वाक्पाणि-पादादीनामव्यापारयितृत्वम्।। २ ।।

---

[3] परैराक्रुष्टस्य इति पाठान्तरम्।

किञ्च -

**तेजः क्षमा धृतिः शौचम् अद्रोहो नातिमानिता।**

**भवन्ति सम्पदं दैवीम् अभिजातस्य भारत।। १६.३ ।।**

तेज इति। **तेजः** प्रागल्भ्यं, न त्वग्गता दीप्तिः। **क्षमा** आकृष्टस्य[4] ताडितस्य वा अन्तर्विक्रियानुत्पत्तिः, उत्पन्नायां विक्रियायां उपशमनमक्रोध इत्यवोचाम। इत्थं क्षमाया अक्रोधस्य च विशेषः। **धृतिः** देहेन्द्रियेष्ववसादं प्राप्तेषु तस्य प्रतिषेधकोऽन्तः-करण-वृत्ति-विशेषो येनोत्तंभितानि करणानि देहश्च नावसीदन्ति। **शौचं** द्वि-विधं मृज्जल-कृतं बाह्यम्, आभ्यन्तरं च मनो-बुद्ध्योर्नैर्मल्यं माया-रागादि-कालुष्याभावः, एवं द्वि-विधं शौचम्। **अद्रोहः** पर-जिघांसाभावोऽहिंसनम्।

[4] आक्रुष्टस्य इति पाठान्तरम्।

**नातिमानिता** अत्यर्थं मानोऽतिमानः, स यस्य विद्यते सोऽतिमानी, तद्भावोऽतिमानिता, तदभावो नातिमानिता, आत्मनः पूज्यतातिशय-भावनाभाव इत्यर्थः।

**भवन्ति** अभयादीन्येतदन्तानि **सम्पदम्** **अभिजातस्य**।

किं-विशिष्टां सम्पदम् **दैवीं** देवानां या सम्पत् ताम्[5] अभिलक्ष्य जातस्य दैव-विभूत्यर्हस्य भावि-कल्याणस्येत्यर्थः, हे **भारत**।। ३ ।।

[5] देवानां सम्पदम् इति पाठान्तरम्।

अथेदानीमासुरी संपदुच्यते -

**दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च।**

**अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्।। १६.४ ।।**

दम्भ इति। **दम्भः** धर्म-ध्वजित्वं **दर्पः** विद्या-धन-स्व-जनादि-निमित्त उत्सेकः। **अतिमानः** पूर्वोक्तः।

**क्रोधश्च**, **पारुष्यमेव** **च** परुष-वचनं - यथा काणं चक्षुष्मान्, विरूपं रूपवान्, हीनाभिजनमुत्तमाभिजन

इत्यादि। **अज्ञानं** **च** अविवेक-ज्ञानं मिथ्याप्रत्ययः। कर्त्तव्याकर्त्तव्यादि-विषयम्।

**अभिजातस्य** **पार्थ**। किमभिजातस्येत्याह - **सम्पदम्** **आसुरीम्** असुराणां संपदासुरी ताम्

अभिजातस्येत्यर्थः।। ४ ।।

अनयोः सम्पदोः कार्यमुच्यते -

**दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।**

**मा शुचः सम्पदं दैवीम् अभिजातोऽसि पाण्डव।। १६.५ ।।**

दैवीति। **दैवी** **सम्पद्** या सा **विमोक्षाय** संसार-बन्धनात्। **निबन्धाय** नियतो बन्धो निबन्धस्तदर्थम् **आसुरी** सम्पद् **मता** अभिप्रेता। तथा राक्षसी च। तत्रैवम् उक्तेऽर्जुनस्यान्तर्गतं भावं किमहमासुरसम्पद्युक्तः किं वा दैवसम्पद्युक्तः इत्येवम् आलोचना-रूपमालक्ष्याह भगवान् - **मा** **शुचः** शोकं मा कार्षीः, **सम्पदं** **दैवीम्** **अभिजातोऽसि** अभिलक्ष्य जातोऽसि भावि-कल्याणस्त्वमसीत्यर्थो हे **पाण्डव**।। ५।।

**द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।**

**दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे श्रृणु।। १६.६ ।।**

द्वाविति। **द्वौ** द्वि-संख्याकौ **भूतसर्गौ** भूतानां मनुष्याणां सर्गौ सृष्टी भूत-सर्गौ। सृज्येते इति सर्गौ।

भूतान्येव सृज्यमानानि दैवासुर-सम्पद्-द्वय-युक्तानि द्वौ भूतसर्गावित्युच्येते।

द्वया ह प्राजापत्या देवाश्चासुराश्च (बृ १.३.१) इति श्रुतेः। **लोकेऽस्मिन्** संसारे इत्यर्थः।

सर्वेषां द्वैविध्योपपत्तेः। कौ तौ भूत-सर्गावित्युच्येते - प्रकृतावेव **दैव** **आसुर** **एव** **च**।

उक्तयोरेव पुनरनुवादे प्रयोजनमाह - **दैवः** भूत-सर्गः अभयं सत्त्व-संशुद्धिः (गी १६.१) इत्यादिना

**विस्तरशः** विस्तर-प्रकारैः **प्रोक्तः** कथितः, नत्वासुरो विस्तरशः।

अतः तत्परिवर्जनार्थम् **आसुरं** **पार्थ** **मे** मम वचनादुच्यमानं विस्तरशः **श्रृणु** अवधारय।। ६ ।।

आ अध्याय-परिसमाप्तेरासुरी सम्पत्प्राणि-विशेषणत्वेन प्रदर्श्यते प्रत्यक्षी-करणेन च शक्यते तस्याः

परिवर्जनं कर्त्तुमिति -

**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।**

**न शौचं नापि चाचारो न सत्यं तेषु विद्यते।। १६.७ ।।**

प्रवृत्तिमिति। **प्रवृत्तिं** **च** प्रवर्त्तनं, यस्मिन् पुरुषार्थ-साधने कर्त्तव्ये प्रवृत्तिस्तां **निवृत्तिं** **च** एतद्विपरीतां

यस्मादनर्थहेतोर्निवर्त्तितव्यं सा निवृत्तिस्तां च **जना** **आसुरा** **न** **विदुः** न जानन्ति।

न केवलं प्रवृत्ति-निवृत्ती एव ते न विदुः, **न** **शौचं** **नापि** **चाचारो** **न** **सत्यं** **तेषु** **विद्यते**।

अशौचा अनाचारा मायाविनोऽनृत-वादिनो ह्यासुराः।। ७ ।।

किञ्च -

**असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।**

**अपरस्परसम्भूतं किमन्यत्कामहैतुकम्।। १६.८ ।।**

असत्यमिति। **असत्यं** यथा वयमनृत-प्रायास्तथेदं **जगत्** सर्वमसत्यम् **अप्रतिष्ठं** च नास्य धर्माधर्मौ प्रतिष्ठा

अतोऽप्रतिष्ठं च, इति **ते** आसुरा जना **जगद् आहुः**।

**अनीश्वरं** न च धर्माधर्म-सव्यपेक्षकोऽस्य शासितेश्वरो विद्यते इत्यतोऽनीश्वरं जगदाहुः।

किञ्च **अपरस्परसम्भूतं** काम-प्रयुक्तयोः स्त्री-पुरुषयोरन्योन्य-संयोगाज्जगत्सर्वं सम्भूतम्।

**किम् अन्यत्कामहैतुकं** काम-हेतुकमेव काम-हैतुकम्। किमन्यज्जगतः कारणम् न किञ्चिद् अदृष्टं

धर्माधर्मादि कारणान्तरं विद्यते जगतः। काम एव प्राणिनां कारणमिति लोकायतिक-दृष्टिरियम्।। ८ ।।

**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।**

**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।। १६.९ ।।**

एतामिति। **एतां** **दृष्टिमवष्टभ्य** आश्रित्य **नष्टात्मानः** नष्ट-स्वभावाः विभ्रष्ट-परलोक-साधना **अल्पबुद्धयः**

विषय-विषया अल्पैव बुद्धिर्येषां तेऽल्पबुद्धयः।

**प्रभवन्ति** उद्भवन्ति **उग्र-कर्माणः** क्रूर-कर्माणो हिंसात्मकाः। **क्षयाय** जगतः प्रभवन्तीति सम्बन्धः।

**जगतः** **अहिताः** शत्रव इत्यर्थः।। ९ ।।

ते च -

**काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।**

**मोहाद् गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः।। १६.१० ।।**

काममिति। **कामम्** इच्छा-विशेषम् **आश्रित्य** अवष्टभ्य **दुष्पूरम्** अशक्य-पूरणं **दम्भमान-मदान्विताः** दम्भश्च मानश्च मदश्च दम्भ-मान-मदाः तैरन्विता दम्भ-मान-मदान्विताः **मोहाद्** अविवेकतो **गृहीत्वा** उपादाय **असद्ग्राहान्** अशुभ-निश्चयान् **प्रवर्त्तन्ते** लोके **अशुचिव्रताः** अशुचीनि व्रतानि येषां तेऽशुचि-व्रताः।। १० ।।

किञ्च -

**चिन्तामपरिमेयां च प्रलयान्ताम् उपाश्रिताः।**

**कामोपभोगपरमाः एतावदिति निश्चिताः।। १६.११ ।।**

चिन्तामिति। **चिन्ताम्** **अपरिमेयां** **च** न परिमातुं शक्यते यस्याश्चिन्ताया इयत्ता सा अपरिमेया

तामपरिमेयां **प्रलयान्तां** मरणान्ताम् **उपाश्रिताः** सदा चिन्ता-परा इत्यर्थः।

**कामोपभोगपरमाः** काम्यन्ते इति कामाः विषयाः शब्दादयस्तदुपभोग-परमाः।

अयमेव परमः पुरुषार्थो यः कामोपभोग इत्येवं-निश्चितात्मानः **एतावदिति** **निश्चिताः**।। ११ ।।

**आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।**

**ईहन्ते कामभोगार्थम् अन्यायेनार्थसञ्चयान्।। १६.१२ ।।**

आशापाशेति। **आशापाशशतैः** आशा एव पाशास्तच्छतैराशा-पाश-शतैः **बद्धाः** नियन्त्रिताः सन्तः सर्वत आकृष्यमाणाः। **कामक्रोधपरायणाः** काम-क्रोधौ परमयनं पर आश्रयो येषां ते काम-क्रोध-परायणाः।

**ईहन्ते** चेष्टन्ते **कामभोगार्थं** काम-भोग-प्रयोजनाय न धर्मार्थम्, **अन्यायेन** परस्वापहरणादिनेत्यर्थः।

किम्**अर्थसञ्चयान्** अर्थ-प्रचयान्।। १२ ।।

ईदृशश्च तेषामभिप्रायः -

**इदमद्य मया लब्धम् इदं प्राप्स्ये मनोरथम्।**

**इदमस्ति इदमपि मे भविष्यति पुनर्धनम्। १६.१३ ।।**

इदमिति। **इदं** द्रव्यम् **अद्य** इदानीं **मया** **लब्धम्**। **इदम्** अन्यत् **प्राप्स्ये** **मनोरथं** मनस्तुष्टिकरम्।

**इदं** च **अस्ति**। **इदमपि** **मे** **भविष्यति** आगामिनि संवत्सरे **पुनर्धनम्**।

तेनाहं धनी विख्यातो भविष्यामीति।। १३ ।।

**असौ मया हतः शत्रुर्हनिष्ये चापरानपि।**

**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।। १६.१४ ।।**

असौ मयेति। **असौ** देवदत्त-नामा **मया** **हतः** दुर्जयः **शत्रुः**। **हनिष्ये** **चापरान्** अन्यान् वराकान् **अपि**।

किमेते करिष्यन्ति तपस्विनः सर्वथापि नास्ति मत्तुल्यः।

**ईश्वरोऽहम्**। **अहं** **भोगी**। सर्व-प्रकारेण च **सिद्धोऽहं** संपन्नः पुत्रैः पौत्रैर्नप्तृभिः।

न केवलं मानुषोऽहं **बलवान्** **सुखी** चाहमेव। अन्ये तु भूमि-भारायावतीर्णाः।। १४ ।।

**आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मया।**

**यक्ष्ये दास्यामि मोदिष्ये इत्यज्ञानविमोहिताः।। १६.१५ ।।**

आढ्य इति। **आढ्यः** धनेन[6] **अभिजनवान्** सप्त-पुरुषं[7] श्रोत्रियत्वादि-संपन्नः।

तेनापि न मम तुल्योऽस्ति कश्चित्। **कोऽन्योस्ति** **सदृशः** तुल्यो **मया**।

किञ्च **यक्ष्ये** यागेनाप्यन्यान् अभिभविष्यामि। **दास्यामि** नटादिभ्यः। **मोदिष्ये** हर्षं चातिशयं प्राप्स्यामि।

**इति** एवम् **अज्ञानविमोहिताः** अज्ञानेन विमोहिताः, विविधमविवेक-भावमापन्नाः।। १५ ।।

---

6 धनेन अभिजनेन इत्यधिकं दृश्यते।

7 यस्य प्राचीनाः पितृपितामहादयस्सप्त पुरुषाः श्रोत्रियाः (रामरायकविः)

**अनेकचित्तविभ्रान्ताः मोहजालसमावृताः।**

**प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ।। १६.१६ ।।**

अनेकेति। **अनेकचित्तविभ्रान्ताः** उक्त-प्रकारैरनेकैश्चित्तैर्विविधं भ्रान्ता अनेक-चित्त-विभ्रान्ताः

**मोहजालसमावृताः** मोहोऽविवेकोऽज्ञानं तदेव जालमिव आवरणात्मकत्वात् तेन समावृताः।

**प्रसक्ताः** **कामभोगेषु** तत्रैव निषण्णाः सन्तः तेनोपचित-कल्मषाः **पतन्ति** **नरकेऽशुचौ** वैतरण्यादौ।। १६

।।

**आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः।**

**यजन्ते नामयज्ञैस्ते दम्भोनाविधिपूर्वकम्।। १६.१७ ।।**

आत्मेति। **आत्मसम्भाविताः** सर्व-गुण-विशिष्टतया आत्मनैव सम्भाविता आत्म-सम्भाविताः,

न साधुभिः। **स्तब्धाः** अप्रणतात्मानः।

**धनमानमदान्विताः** धन-निमित्तो मानो मदश्च ताभ्यां धन-मान-मदाभ्यामन्विताः।

**यजन्ते** **नामयज्ञैः** नाम-मात्रैर्यज्ञैः **ते** **दम्भेन** धर्म-ध्वजितया **अविधिपूर्वकं** विधि-विहिताङ्गेति-कर्त्तव्यता-

रहितम्[8]।। १७ ।।

[8] रहितैः इति पाठान्तरम्।

**अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः।**

**मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।। १६.१८ ।।**

अहमिति। **अहङ्कारम्** अहङ्करणमहंकारो विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैः विशिष्टमात्मानमहमिति मन्यते सोऽहंकारोऽविद्याख्यः कष्ट-तमः सर्व-दोषाणां मूलं सर्वानर्थ-प्रवृत्तीनां च तम्। तथा **बलं** पराभिभव-निमित्तं काम-रागान्वितम्। **दर्पं** दर्पो नाम यस्योद्भवे धर्ममतिक्रामति सोऽयमन्तः-करणाश्रयो दोष-विशेषः। **कामं** स्त्र्यादि-विषयम्। **क्रोधम्** अनिष्ट-विषयम्।

एतानन्यान् **च** महतो दोषान् **संश्रिताः**। किञ्च ते **माम्** ईश्वरम् **आत्मपरदेहेषु** स्वदेहे परदेहेषु च त[illegible]द्धि-कर्म-साक्षि-भूतं मां **प्रद्विषन्तः** मच्छासनातिवर्त्तित्वं प्रद्वेषस्तं कुर्वन्तः **अभ्यसूयकाः** सन्मार्गस्थानां गुणेष्वसहमानाः।। १८ ।।

**तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।**

**क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु।। १६.१९ ।।**

तानहमिति। **तानहं** सर्वान् सन्मार्ग-प्रति-पक्ष-भूतान् साधु-द्वेषिणः, **द्विषतः** च मां **क्रूरान्** **संसारेषु** एवानेक-नरक-संसरण-मार्गेषु **नराधमान्** अधर्म-दोषवत्त्वात् **क्षिपामि** प्रक्षिपामि **अजस्रं** सन्ततम् **अशुभान्** अशुभ-कर्म-कारिणः **आसुरीष्वेव** क्रूर-कर्म-प्रायासु व्याघ्र-सिंहादि-**योनिषु** क्षिपामीत्यनेन सम्बन्धः।। १९ ।।

**आसुरीं योनिमापन्नाः मूढा जन्मनि जन्मनि।**

**मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।। १६.२० ।।**

आसुरीमिति। **आसुरीं** **योनिमापन्नाः** प्रतिपन्नाः **मूढाः** अविवेकिनः **जन्मनि** **जन्मनि** प्रति-जन्म तमो-बहुलास्वेव योनिषु जायमाना अधो गच्छन्तो मूढा **माम्** ईश्वरम् **अप्राप्य** अनासाद्य **एव** हे **कौन्तेय** **ततः** तस्मादपि **यान्ति** **अधमां** निकृष्टतमां **गतिम्**।

मामप्राप्यैव इति न मत्प्राप्तौ काचिदप्याशङ्काऽस्ति, अतो मच्छिष्ट-साधु-मार्गमप्राप्येत्यर्थः।। २० ।।

सर्वस्या आसुर्याः सम्पदः संक्षेपोऽयमुच्यते यस्मिंस्त्रिविधे सर्व आसुर-सम्पद्भेदोऽनन्तोऽपि अन्तर्भवति,

यत्परिहारेण परिहृतश्च भवति, यन्मूलं सर्वस्यानर्थस्य, तदेतदुच्यते -

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**

**कामक्रोधस्तथा लोभः तस्मादेतत् त्रयं त्यजेत्।। १६.२१ ।।**

त्रिविधमिति। **त्रिविधं** त्रि-प्रकारं **नरकस्य** प्राप्तौ **इदं** **द्वारं** **नाशनमात्मनः** यद् द्वारं प्रविशन्नेव

नश्यत्यात्मा। कस्मैचित्पुरुषार्थाय योग्यो न भवतीत्येतत्। अत उच्यते - द्वारं नाशनम् आत्मन इति।

किं तत् **कामक्रोधस्तथा** **लोभः**। **तस्मादेतत्** **त्रयं** **त्यजेत्**।

यत एतद् द्वारं नाशनमात्मनस्तस्मात् कामादि-त्रयमेतत् त्यजेत्।। २१ ।।

त्यागस्तुतिरियम् -

**एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः**

**आचरत्यात्मनः श्रेयः ततो याति परां गतिम्।। १६.२२ ।।**

एतैरिति। **एतैर्विमुक्तः** **कौन्तेय** **तमोद्वारैः** तमसो नरकस्य दुःख-मोहात्मकस्य द्वाराणि कामादयस्तैरेतैः **त्रिभिः** विमुक्तो **नरः** **आचरति** अनुतिष्ठति। किम् **आत्मनः** **श्रेयः**। यत्प्रतिबद्धः पूर्वं नाचचार तदपगमादाचरति। **ततः** तदाचरणाद् **याति** **परां** **गतिं** मोक्षमपि इति।। २२ ।।

सर्वस्यैतस्य आसुर-सम्पत्परिवर्जनस्य श्रेय-आचरणस्य च शास्त्रं कारणं, शास्त्र-प्रमाणादुभयं शक्यं कर्त्तुं,

नान्यथा। अतः -

**यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः।**

**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।। १६.२३ ।।**

य इति। **यः** **शास्त्रविधिं** कर्त्तव्याकर्त्तव्य-ज्ञान-कारणं विधि-प्रतिषेधाख्यम् **उत्सृज्य** त्यक्त्वा **वर्त्तते**

**कामकारतः** कामप्रयुक्तः सन्, **न** **स** **सिद्धिं** पुरुषार्थ-योग्यताम् **अवाप्नोति**।

**न** अप्यस्मिंल्लोके **सुखम्**। **न** अपि **परां** प्रकृष्टां **गतिं** स्वर्गं मोक्षं वा।। २३ ।।

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**

**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि।। १६.२४ ।।**

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः।।

तस्मादिति। **तस्माच्छास्त्रं** **प्रमाणं** ज्ञान-साधनं **ते** तव **कार्याकार्यव्यवस्थितौ** कर्त्तव्याकर्त्तव्य-व्यवस्थायाम्। अतो **ज्ञात्वा** बुद्ध्वा **शास्त्रविधानोक्तं** विधिर्विधानं शास्त्रेण विधानं शास्त्र-विधानं कुर्यात्, न कुर्यात्इत्येवं-लक्षणं, तेनोक्तं स्व-**कर्म** यत्तत् **कर्त्तुमिहार्हसि**। इहेति कर्माधिकार-भूमि-प्रदर्शनार्थमिति।।

२४ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीमद्भगवद्गीताभाष्ये षोडशोऽध्यायः।।

# अध्याय १७

# श्रद्धात्रयविभागयोगः

तस्माच्छास्त्रं प्रमाणं ते (गी १६.२४) इति भगवद्वाक्याल्लब्ध-प्रश्न-बीजोऽर्जुन उवाच -

**अर्जुन उवाच।**

**ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः।**

**तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः।। १७.१ ।।**

ये इति। **ये** केचिदविशेषिताः **शास्त्रविधिं** शास्त्र-विधानं श्रुति-स्मृति-शास्त्र-चोदनाम् **उत्सृज्य** परित्यज्य **यजन्ते** देवादीन् पूजयन्ति **श्रद्धयान्विताः** श्रद्धया आस्तिक्य-बुद्ध्या अन्विताः संयुक्ताः सन्तः। श्रुति-लक्षणं स्मृति-लक्षणं वा कञ्चिच्छास्त्र-विधिमपश्यन्तो वृद्ध-व्यवहार-दर्शनादेव श्रद्दधानतया ये देवादीन्पूजयन्ति ते इह ये शास्त्र-विधिमुत्सृज्य यजन्ते श्रद्धयान्विताः इत्येवं गृह्यन्ते।

ये पुनः कञ्चिच्छास्त्र-विधिमुपलभमाना एव तम् उत्सृज्य अयथा-विधि देवादीन्पूजयन्ति ते इह ये

शास्त्रविधिमुत्सृज्य यजन्ते इति न परिगृह्यन्ते। कस्मात् श्रद्धयान्वितत्व-विशेषणात्।

देवादि-पूजा-विधि-परं किञ्चिच्छास्त्रं पश्यन्त एव तदुत्सृज्य अश्रद्दधानतया तद्विहितायां देवादि-पूजायां

श्रद्धयाऽन्विताः प्रवर्त्तन्ते इति न शक्यं कल्पयितुं यस्मात्, तस्मात्पूर्वोक्ता एव ये शास्त्रविधिमुत्सृज्य

यजन्ते श्रद्धयान्विताः इत्यत्र गृह्यन्ते।

**तेषाम्** एवं-भूतानां **निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः** किं सत्त्वं निष्ठाऽवस्थानम्, आहोस्विद्रजः,

अथवा तमः इति।

एतदुक्तं भवति, या तेषां देवादि-विषया पूजा सा किं सात्त्विकी, आहोस्विद्राजसी, उत तामसीति।। १ ।।

सामान्य-विषयोऽयं प्रश्नो नाप्रविभज्य प्रति-वचनमर्हतीति श्रीभगवानुवाच -

**श्रीभगवानुवाच।**

**त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।**

**सात्त्विकी राजसी चैव तामसी चेति तां श्रृणु।। १७.२ ।।**

त्रिविधेति। **त्रिविधा** त्रि-प्रकारा **भवति** **श्रद्धा**। यस्यां निष्ठायां त्वं पृच्छसि **देहिनां** **सा** **स्वभावजा**।

जन्मान्तर-कृतो धर्मादि-संस्कारो मरण-कालेऽभिव्यक्तः स्वभाव उच्यते। ततो जाता स्वभावजा।

**सात्त्विकी** सत्त्व-निर्वृत्ता देव-पूजादि-विषया, **राजसी** रजो-निर्वृत्ता यक्ष-रक्षः-पूजादि-विषया,

**तामसी** तमो-निर्वृत्ता प्रेत-पिशाचादि-पूजा-विषया, एवं त्रि-विधा। **ताम्** उच्यमानां श्रद्धां **श्रृणु**

अवधारय।। २ ।।

सैवं त्रिविधा भवति -

**सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।**

**श्रद्धामयोऽयं पुरुषः यो यच्छ्रद्धस्स एव सः।। १७.३ ।।**

सत्त्वानुरूपेति। **सत्त्वानुरूपा** विशिष्ट-संस्कारोपेतान्तः-करणानुरूपा **सर्वस्य** प्राणि-जातस्य **श्रद्धा भवति**

**भारत**। यद्येवं ततः किं स्यादित्युच्यते - **श्रद्धामयः** श्रद्धा-प्रायः **अयं पुरुषः** संसारी जीवः।

कथम् **यो यच्छ्रद्धो** या श्रद्धा यस्य जीवस्य स यच्छ्रद्धः **स एव** तच्छ्रद्धानुरूप एव **सः** जीवः।। ३ ।।

ततश्च कार्येण लिङ्गेन देवादि-पूजया सत्त्वादि-निष्ठा अनुमेयेत्याह -

**यजन्ते सात्त्विका देवान् यक्ष-रक्षांसि राजसाः।**

**प्रेतान् भूतगाणांश्चान्ये यजन्ते तामसा जनाः।। १७.४ ।।**

यजन्ते इति। **यजन्ते** पूजयन्ति **सात्त्विकाः** सत्त्व-निष्ठाः **देवान्**। **यक्षरक्षांसि** **राजसाः**।

**प्रेतान्** **भूतगाणांश्च** सप्त-मातृकादींश्च **अन्ये** **यजन्ते** **तामसा** **जनाः**।। ४ ।।

एवं कार्यतो निर्णीताः सत्त्वादि-निष्ठाः शास्त्र-विध्युत्सर्गे। तत्र कश्चिदेव सहस्रेषु देव-पूजादि-तत्परः सत्त्व-निष्ठो भवति, बाहुल्येन तु रजो-निष्ठास्तमो-निष्ठाश्चैव प्राणिनो भवन्ति। कथम् -

**अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।**

**दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः।। १७.५ ।।**

अशास्त्रविहितमिति। **अशास्त्रविहितं** न शास्त्र-विहितमशास्त्र-विहितं **घोरं** पीडा-करं प्राणिनामात्मनश्च **तपः** **तप्यन्ते** निर्वर्त्तयन्ति **ये** तपो **जनाः** ते च **दम्भाहङ्कारसंयुक्ताः** दम्भश्चाहङ्कारश्च दम्भाहङ्कारौ ताभ्यां संयुक्ता दम्भाहङ्कार-संयुक्ताः **कामराग-बलान्विताः** कामश्च रागश्च काम-रागौ तत्कृतं बलं काम-राग-बलं तेनान्विताः काम-राग-बलैर्वाऽन्विताः।। ५ ।।

**कर्शयन्तः शरीरस्थं भूतग्राममचेतसः।**

**मां चैवान्तः शरीरस्थं तान् विद्ध्यासुरनिश्चयान्।। १७.६।।**

कर्शयन्त इति। **कर्शयन्तः** कृशी-कुर्वन्तः **शरीरस्थं** **भूतग्रामं** करण-समुदायम् **अचेतसः** अविवेकिनः।

**मां** **चैव** तत्कर्म-बुद्धि-साक्षि-भूतं **अन्तः-शरीरस्थं** नारायणं कर्शयन्तः। मदनुशासनाकरणमेव मत्कर्शनम्।

**तान्** **विद्ध्यासुरनिश्चयान्** आसुरो निश्चयो येषां ते आसुर-निश्चयाः तान्, परिहरणार्थं विद्धीत्युपदेशः।। ६ ।।

आहाराणां च रस्य-स्निग्धादि-वर्ग-त्रय-रूपेण भिन्नानां यथा-क्रमं सात्त्विक-राजस-तामस-पुरुष-प्रियत्व-दर्शनमिह क्रियते, रस्य-स्निग्धादिष्वाहार-विशेषेष्वात्मनः प्रीत्यतिरेकेण लिङ्गेन सात्त्विकत्वं, राजसत्वं, तामसत्वं च बुद्ध्वा रजस्-तमो-लिङ्गानामाहाराणां परि-वर्जनार्थं, सत्त्व-लिङ्गानां चोपादानार्थम्।

तथा यज्ञादीनामपि सत्त्वादि-गुण-भेदेन त्रि-विधत्व-प्रतिपादनमिह राजस-तामसान् बुद्ध्वा कथं नु नाम परित्यजेत्, सात्त्विकानेव अनुतिष्ठेत् इत्येवमर्थमाह -

**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।**

**यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रृणु।। १७.७ ।।**

आहार इति। **आहारस्त्वपि** **सर्वस्य** भोक्तुः प्राणिनः **त्रिविधो** **भवति** **प्रियः** इष्टः।

**तथा** **यज्ञः**, तथा **तप**ः, तथा **दानम्**। **तेषाम्** आहारादीनां **भेदमिमं** वक्ष्यमाणं **श्रृणु**।। ७।।

**आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**

**रस्याः स्निग्धा स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।। १७.८ ।।**

आयुरिति। आयुश्च सत्त्वं च बलं च आरोग्यं च सुखं च प्रीतिश्च आयुस्सत्त्व-बलारोग्य-सुख-प्रीतयः तासां विवर्धना **आयुस्सत्त्व-बलारोग्य-सुख-प्रीति-विवर्धनाः**।

ते च **रस्याः** रसोपेताः **स्निग्धाः** स्नेहवन्तः **स्थिराः** चिर-काल-स्थायिनो देहे **हृद्याः** हृदय-प्रिया **आहाराः** **सात्त्विकप्रियाः** सात्त्विकस्येष्टाः।। ८ ।।

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।**

**आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः।। १७.९ ।।**

कट्विति। **कट्वम्ल-लवणात्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः** इत्यत्र अतिशब्दः कट्वादिषु सर्वत्र योज्यः, अतिकटुरति-तीक्ष्ण इत्येवम्। कटुश्चाम्लश्च लवणश्चात्युष्णश्चातितीक्ष्णश्च रूक्षश्च विदाही च कट्वम्ल-लवणात्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः, एवंविधा **आहारा** **राजसस्येष्टाः**, **दुःखशोकामयप्रदाः** दुःखं च शोकं चाऽऽमयं च प्रयच्छन्तीति दुःख-शोकामयप्रदाः।। ९ ।।

**यातयामं गतरसं पूति पर्युषितं च यत्।**

**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।। १७.१० ।।**

यातयाममिति। **यातयामं** मन्द-पक्वं, निर्वीर्यस्य गतरसेनोक्तत्वात्।

**गतरसं** रस-वियुक्तं **पूति** दुर्गन्धं **पर्युषितं** **च** पक्वं सद्रात्र्यन्तरितं च **यत्**।

**उच्छिष्टमपि** **च** भुक्त-शिष्टमपि **अमेध्यम्** अयज्ञार्हं **भोजनम्** ईदृशं **तामसप्रियम्**।। १० ।।

अथेदानीं यज्ञस्त्रिविध उच्यते -

**अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।**

**यष्टव्यमेवेति मनः समाधाय स सात्त्विकः।। १७.११ ।।**

अफलेति। **अफलाकाङ्क्षिभिः** अफलार्थिभिः **यज्ञो** **विधिदृष्टः** शास्त्र-चोदना-दृष्टः **यः** यज्ञ **इज्यते**

निर्वर्त्यते **यष्टव्यमेवेति** यज्ञ-स्वरूप-निर्वर्त्तनमेव कार्यमिति **मनः** **समाधाय** नानेन पुरुषार्थो मम कर्त्तव्यः

इत्येवं निश्चित्य **स** **सात्त्विकः** यज्ञ उच्यते।। ११ ।।

**अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।**

**इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।। १७.१२ ।।**

अभिसन्धायेति। **अभिसन्धाय** उद्दिश्य **फलं** **दम्भार्थमपि** **चैव** **यदिज्यते** **भरतश्रेष्ठ** **तं** **यज्ञं** **विद्धि** **राजसम्**।। १२ ।।

**विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।**

**श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।। १७.१३ ।।**

विधिहीनमिति। **विधिहीनं** यथा-चोदित-विपरीतम् **असृष्टान्नं** ब्राह्मणेभ्यो न सृष्टं न दत्तमन्नं यस्मिन् यज्ञे सोऽसृष्टान्नस्तमसृष्टान्नं **मन्त्रहीनं** मन्त्रतः स्वरतो वर्णतश्च वियुक्तं मन्त्र-हीनम् **अदक्षिणम्** उक्त-दक्षिणा-रहितं **श्रद्धाविरहितं** **यज्ञं** **तामसं** **परिचक्षते** तमो-निर्वृत्तं कथयन्ति।। १३ ।।

अथेदानीं तपस्त्रिविधमुच्यते -

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**

**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।। १४।।**

देवेति। देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देव-द्विज-गुरु-प्राज्ञाः, तेषां पूजनं **देवद्विजगुरुप्राज्ञ-पूजनं** **शौचमार्जवम्** ऋजुत्वं **ब्रह्मचर्यमहिंसा** **च** शरीर-निर्वर्त्यं **शारीरं** शरीर-प्रधानैः सर्वैरेव कार्यकरणैः कर्त्रादिभिः साध्यं शारीरं **तप** **उच्यते**। पञ्चैते तस्य हेतवः (गी १८.१५) इति हि वक्ष्यति।। १४ ।।

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**

**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।। १७.१५ ।।**

अनुद्वेगेति। **अनुद्वेगकरं** प्राणिनामदुःख-करं **वाक्यं** **सत्यं** **प्रियहितं** **च** **यत्** प्रिय-हिते दृष्टादृष्टार्थे। अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशेष्यते। विशेषण-धर्म-समुच्चयार्थः च-शब्दः। परप्रत्ययार्थं[9] प्रयुक्तस्य वाक्यस्य सत्य-प्रिय-हितानुद्वेगकरत्वानामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनता स्याद्यदि न तद्वाङ्-मयं तपः। तथा सत्य-वाक्यस्येतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनतायां न वाङ्मय-तपस्त्वम्। तथा प्रिय-वाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनस्य न वाङ्मय-तपस्त्वम्। तथा हित-वाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनस्य न वाङ्मय-तपस्त्वम्। किं पुनस्तत्तपः यत्सत्यं वाक्यमनुद्वेगकरं प्रियं हितं च, यत्तत्परमं तत् तपो वाङ्-मयम्। यथा शान्तो भव वत्स, स्वाध्यायं योगं चानुतिष्ठ, तथा ते श्रेयो भविष्यति इति। **स्वाध्यायाभ्यसनं** **चैव** यथा-विधि **वाङ्मयं** **तप** **उच्यते**।। १५

[9] परप्रत्यायनार्थमिति पाठान्तरम्।

।।

**मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**

**भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।। १७.१६ ।।**

मन इति। **मनःप्रसादः** मनसः प्रशान्तिः स्वच्छतापादनं प्रसादः **सौम्यत्वं** यत् सौमनस्यमाहुः मुखादि-प्रसादादि-कार्योन्नेया अन्तःकरणस्य वृत्तिः[10] **मौनं** वाक्संयमोऽपि मनः-संयम-पूर्वको भवतीति कार्येण कारणमुच्यते मनः-संयमो मौनमिति। **आत्म-विनिग्रहः** मनो-निरोधः। सर्वतः सामान्य-रूप आत्म-विनिग्रहः, वाग्विषयस्यैव मनसः संयमो मौनमिति विशेषः। **भावसंशुद्धिः** परैर्व्यवहार-कालेऽमायावित्वं भाव-संशुद्धिः। **इत्येतत् तपो मानसमुच्यते**।। १६ ।।

[10] मुखादि-प्रसाद-कार्यान्तःकरणस्य वृत्तिः इति पाठान्तरम्।

यथोक्तं कायिकं वाचिकं मानसं च तपस्तप्तं नरैः सत्त्वादि-भेदेन कथं त्रि-विधं भवति इत्युच्यते -

**श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।**

**अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते।। १७.१७ ।।**

श्रद्धयेति। **श्रद्धया** आस्तिक्य-बुद्ध्या **परया** प्रकृष्टया **तप्तम्** अनुष्ठितं **तपस्तत्** प्रकृतं **त्रिविधं** त्रि-प्रकारं **त्र्यधि**ष्ठानं **नरैः** अनुष्ठातृभिः **अफलाकाङ्क्षिभिः** फलाकाङ्क्षा-रहितैः **युक्तैः** समाहितैर्यदीदृशं तपस्तत् **सात्त्विकं** सत्त्व-निर्वृत्तं **परिचक्षते** कथयन्ति शिष्टाः।। १७ ।।

**सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।**

**क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्।। १७.१८।।**

सत्कारेति। **सत्कारमानपूजार्थं** सत्कारः साधुकारः साधुरयं, तपस्वी, ब्राह्मणः इत्येवमर्थं, मानो माननं प्रत्युत्थानाभिवादनादिस्तदर्थं, पूजा पाद-प्रक्षालनार्चना-शयितृत्वादिस्तदर्थं च **तपः** सत्कार-मान-पूजार्थं **दम्भेन** **चैव** **यत्** **क्रियते** तपः **तदिह** **प्रोक्तं** कथितं **राजसं** **चलं** कादाचित्क-फलत्वेन **अध्रुवम्**।। १८ ।।

**मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।**

**परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्।। १७.१९ ।।**

मूढेति। **मूढग्राहेण** अविवेक-निश्चयेन **आत्मनः** **पीडया** **यत्** **क्रियते** **तप**ः।

**परस्योत्सादनार्थं** विनाशार्थं **वा** **तत्तामसं** तप **उदाहृतम्**।। १९ ।।

इदानीं दानत्रैविध्यमुच्यते -

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**

**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।। १७.२० ।।**

दातव्यमिति। **दातव्यम्** **इति** एवं मनः-कृत्वा **यद्दानं** **दीयतेऽनुपकारिणे** प्रत्युपकारासमर्थाय, समर्थायामपि निरपेक्षं दीयते **देशे** पुण्ये कुरुक्षेत्रादौ **काले** संक्रान्त्यादौ **पात्रे** **च** षडङ्ग-विद्वेद-पारग इत्यादौ **तद्दानं** **सात्त्विकं** **स्मृतम्**।। २० ।।

**यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।**

**दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।। १७.२१ ।।**

यत्त्विति। **यत्तु** दानं **प्रत्युपकारार्थं** काले त्वयं मां प्रत्युपकरिष्यतीत्येवमर्थं **फलं** **वा** अस्य दानस्य मे

भविष्यत्यदृष्टमिति तद् **उद्दिश्य** **पुनः** **दीयते** **च** **परिक्लिष्टं** खेद-संयुक्तं **तद्दानं** **राजसं** **स्मृतम्**।। २१ ।।

**अदेशकाले यद्दानं अपात्रेभ्यश्च दीयते।**

**असत्कृतमवज्ञातं तत्तामसमुदाहृतम्।। १७.२२ ।।**

अदेशेति। **अदेशकाले** अदेशे अपुण्ये देशे म्लेच्छाशुच्यादि-संकीर्णे अकाले पुण्य-हेतुत्वेनाप्रख्याते संक्रान्त्यादि-विशेष-रहिते **अपात्रेभ्यश्च** मूर्ख-तस्करादिभ्यो देशादि-संपत्तौ वा **असत्कृतं** प्रिय-वचन-पाद-प्रक्षालन-पूजादि-रहितम् **अवज्ञातं** पात्र-परिभव-युक्तं च **यद्दानं** **तत्तामसमुदाहृतम्**।। २२ ।।

यज्ञ-दान-तपः-प्रभृतीनां साद्गुण्य-करणायायमुपदेश उच्यते -

**ओं तत्सदिति निर्देशः ब्रह्मणस्त्रिविधः स्मृतः।**

**ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा।। १७.२३ ।।**

ओमिति। **ओं** **तत्सदिति** एवं **निर्देशः** निर्दिश्यतेऽनेनेति निर्देशः **त्रिविधः** नाम-निर्देशो **ब्रह्मणः** **स्मृतः** चिन्तितो वेदान्तेषु ब्रह्म-विद्भिः। **ब्राह्मणास्तेन** निर्देशेन त्रि-विधेन **वेदाश्च** **यज्ञाश्च** **विहिताः** निर्मिताः **पुरा** पूर्वमिति निर्देशस्तुत्यर्थमुच्यते।। २३ ।।

**तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।**

**प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्।। १७.२४ ।।**

तस्मादिति। **तस्मादोमित्युदाहृत्य** उच्चार्य **यज्ञदानतपःक्रियाः** यज्ञादि-स्वरूपाः क्रियाः प्रवर्त्तन्ते **विधानोक्ताः** शास्त्र-चोदिताः। **सततं** सर्वदा **ब्रह्मवादिनां** ब्रह्म-वदन-शीलानाम्।। २४ ।।

**तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।**

**दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः।। १७.२५ ।।**

तदिति। **तदित्यनभिसन्धाय** तदिति ब्रह्माभिधानं समुच्चार्य अनभिसन्धाय च यज्ञादि-कर्मणः **फलं**, **यज्ञतपःक्रियाः** यज्ञ-क्रियाश्च तपः-क्रियाश्च यज्ञ-तपः-क्रिया **दानक्रियाश्च** **विविधाः** क्षेत्र-हिरण्य-प्रदानादि-लक्षणाः **क्रियन्ते** निर्वर्त्यन्ते **मोक्षकाङ्क्षिभिः** मोक्षार्थिभिः मुमुक्षुभिः।। २५ ।।

ओंतच्छब्दयोर्विनियोग उक्तः। अथेदानीं सच्छब्दस्य विनियोगः कथ्यते -

**सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।**

**प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते।। १७.२६ ।।**

सद्भावे इति। **सद्भावे** असतः सद्भावे यथा अविद्यमानस्य पुत्रस्य जन्मनि तथा **साधुभावे** **च** असद्वृत्तस्यासाधोः सद्वृत्तता साधुभावस्तस्मिन् साधुभावे च **सदित्येतद्** अभिधानं ब्रह्मणः **प्रयुज्यते** तत्रोच्यतेऽभिधीयते। **प्रशस्ते** **कर्मणि** विवाहादौ च **तथा** **सच्छब्दः** **पार्थ** **युज्यते** प्रयुज्यते इत्येतत्।। २६ ।।

**यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।**

**कर्म चैव तदर्थीयं सदित्येवाभिधीयते।। १७.२७ ।।**

यज्ञे इति। **यज्ञे** यज्ञ-कर्मणि या स्थितिः **तपसि** च या स्थितिः **दाने** **च** या स्थितिः सा **च** **सदित्युच्यते** विद्वद्भिः। **कर्म** **चैव** **तदर्थीयं** यज्ञ-दान-तपोर्थीयं अथवा यस्याभिधान-त्रयं प्रकृतं तदर्थीयं यज्ञ-दान-तपोर्थीयं ईश्वरार्थीयमित्येतत्। **सदित्येवाभिधीयते**। तदेतद्यज्ञ-दान-तप-आदि-कर्म असात्त्विकं विगुणमपि श्रद्धा-पूर्वकं ब्रह्मणोऽभिधान-त्रय-प्रयोगेण सगुणं सात्त्विकं संपादितं भवति।। २७ ।।

तत्र च सर्वत्र श्रद्धा-प्रधानतया सर्वं सम्पाद्यते यस्मात् तस्मात् -

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**

**असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह।। १७.२८ ।।**

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे

श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः।।

अश्रद्धयेति। **अश्रद्धया** **हुतं** हवनं कृतमश्रद्धया, **दत्तं** च ब्राह्मणेभ्योऽश्रद्धया, **तपस्तप्तम्** अनुष्ठितमश्रद्धया, तथाऽश्रद्धयैव **कृतं** यत्स्तुति-नमस्कारादि तत्सर्वम् **असदित्युच्यते** मत्प्राप्ति-साधन-मार्ग-बाह्यत्वात् **पार्थ**। **न** **च** **तत्** बह्वायासमपि **प्रेत्य** फलाय, **नो** अपि **इह** अर्थं, साधुभिर्निन्दितत्वादिति।। २८।।